वा नाश्यतां धनुः” भा०व० ७८अ० । “दीव्य यत् कैतवं पाण्डव ! तेऽवशिष्टम्” भा० स० ६३अ० । “यद्वोचस्तदवैमि कैतवम्” कुमा०

**कैतवेय** पु० कितवायाः अपत्यं ढक् । अंशुमन्नृपसुते उलूके चूतज्ञभेदे “उलूकः कैतवेयश्च वीरश्चांशुमतः सुतः” हरिवं०६८अ० । वा० अञ् । कैतव्योऽप्यत्र “उलूकः गच्छ कैतव्य ! पाण्डवान् सहसोमकान्” भा० उ०५८अ० ।

**कैन्दासायन** पुंस्त्री० किन्दासस्य युवापत्यम् हरिता० फक् । निन्दितदासस्य यून्यपत्ये

**कैन्नर** त्रि० किन्नरः तन्नामवर्षमभिजनोऽस्य तक्षशिला० अञ् । पित्रादिक्रमेण १किन्नरवर्षवासिनि । किन्नरस्येदम् अण् । २किंपुरुषसम्बन्धिनि त्रि० उभयत्र स्त्रियां ङीप् ।

**कैमुतिक** पु० किमुत इत्यर्थात् आगतः ठक् । किमुतेत्यर्थतः प्राप्ते न्यायभेदे । यथा बह्वायाससाध्यकर्मसमर्थस्य अल्पायाससाध्यकर्म्मसामर्थ्यं तन्न्यायसिद्धमेवन्यदप्यूह्यम् ।

**कैरलेय** त्रि० केरलानां राजा बा०ढक् । केरलदेशनृपे “उत्तमौजास्तथा शाल्वः कैरलेयश्च कौशिकः” हरिव०६८अ०

**कैरव** न० के जले रौति रु—अच् अलुक् स० केरवो हंसस्तस्य प्रियम् अण् । १कुमुदे, शुक्लोत्पले, अमरः २शत्रौ पु० कैतवे न० मेदि० । “जाग्रत्कलं कैरवध्वंसं हस्तयते च या सुमनसामुल्लासिनी मानसे” चन्द्रालो० । “कस्मै नाथ ! समर्प्य कैरवकुलं व्योमान्तमालम्बसे” उद्भटः । ततः पुष्करा० इनि ङीप् । कैरविणी कुमुदयुक्तलतायां तत्समूहे च स्त्री ।

**कैरविणीखण्ड** पु०समूहे कमला० खण्ड । कुमुदलतासमूहे

**कैरविणीफल** न०६त० । (वेरा) इति ख्याते कुमुदिनीवीजे

**कैरविन्** पु० कैरवं प्रकाश्यतयाऽस्त्यस्य इनि । चन्द्रे शब्दमा०

**कैरवी** स्त्री कैरवस्य प्रिया अण् ङीप् । १चन्द्रिकायां मेदि० २मेथिकायां राजनि० [स्वार्थे अण् । स्थावरविषभेदे हेम०।

**कैराटक** पु० किरं पर्य्यन्तभूमिमटति अट—ण्वुल् ६त० ततः

**कैरात** पु० किरात इव शूरः इवार्थे अण् । १बलवत्पुरुषे, किरातदेशे (पर्य्यन्तदेशे) भवः अण् । २भूनिम्बे शब्दच० ३शम्बरचन्दने न० राजनि० ४भूनिम्बे पु० राजनि० । किरातस्येदम् अण् । ५किरातसम्बन्धिनि त्रि० “कैरातं वेशमास्थाय” भा०व० ३९२अ० ।

**कैराल** न० किरं पर्य्यन्तभूमिमलति अल—अण् उप०स० ततः स्वार्थे अण् । १विडङ्गे वैद्यकम् । गौरा०ङीप् । २कैराली तदर्थे स्त्री राजनि० ।

**कैलास** पु० के जले लासो लसनं दीप्तिरस्य अलुक्स० केलसः स्फटिकस्तस्येव शुभ्रः अण्, केलीनां समूहः अण्—कैलं तेनास्यतेऽत्र आस—आधारे घञ् वा । शिवकुवेरयोः स्थाने पर्व्वतभेदे । स च वृह० सं० कूर्म्मविभागे उत्तरस्यामुक्तः “उत्तरतः कैलासोहिमवान् गिरिर्धनुष्मांश्च” । स च अलकासमीपस्थितः “अलका समया चैष कैलासः शङ्करालयः” काशी० १२अ० । तत्स्वरूपञ्च हरिव० २१७अ० वर्णितं यथा

“मन्दरस्योग्रशिखरः, स्फाटिकैर्म्मणिभिश्चितः । वज्रगर्भैर्निरालम्बैः स्वर्गोपम इवाबभौ । सह शृङ्गैश्च कैलासः शिलाधातुविभूषितः । तोरणैश्चैव निविड़ैः प्रांशुभिश्चैव पादपैः । प्रवादयद्भिर्गन्धर्व्वैः किन्नरैश्च प्रगायिभिः । देवकन्याङ्गहावैश्च प्रक्रीडित इवाबभौ । मधुरैर्व्वाद्यगीतैश्च नृत्यैश्चाभिनयोद्धतैः । शृङ्गारैः सुप्रहावैश्च कैलासो मदनायते” ।

तस्य विष्णुनाभिपद्मस्य गर्भाङ्कुरत्वं हरिवं० २०२ अ० वर्णितं यथा

“तस्मिन् हिरण्मये पद्मे बहुयोजनविस्तृते । सर्व्वतेजोगुणमये पार्थिवैर्लक्षणैर्युते । तच्च पद्मं पुराणज्ञाः पृथिवीरूपमुत्तमम् । नारायणात् समुत्पन्नं प्रवदन्ति महर्षयः । या तु पद्मासना देवी तां पृथ्वीं परिचक्षते । ये तु गर्भाङ्कुराः सारास्तान् दिव्यान् पर्व्वतान् विदुः । हिमवन्तञ्च मेरुञ्च नीलं निषधमेव च । कैलासं क्रौञ्चवन्तञ्च तथाऽद्रिं गन्धमादनम् । पुण्यं त्रिशिखरं चैव कान्तं मन्दरमेव च । उदयञ्च गिरिश्रेष्ठं विन्ध्यकस्तञ्च पर्व्वतम् । एते देवगणानाञ्च सिद्धानाञ्च महात्मनाम् । आश्रयाः सर्वभूतानां पुण्याः कामयुजोऽद्रयः । एतेषामन्तरो देशो जम्बुद्वीप इति स्मृतः” ।

कैलासप्रमाणञ्च भाग० ५,१६,२२, उक्तं यथा “जठरदेवकूटौ मेरुं पूर्व्वेण द्वादशयोजनसहस्रमुदगायतौ द्विसहस्रपृथुतुङ्गौ भवतः एवमपरेण पवनपारियात्रौ” दक्षिणेन कैलासकरवीरौ प्रागायतौ” । “शुभ्रं पाण्डरमेघाभं कैलासञ्च नगोत्तमम्” हरि० २२६अ० । “कैलासस्य त्रिदशवनितादर्पणस्यातिथिः स्याः” मेघ०

**कैलासनाथ** पु० ६त० । १शिवे २कुवेरे च “कैलासनाथं तरसा जिगीषुः” रघुः । कैलासपत्यादयोऽप्यत्र ।

**कैलासयात्रा** स्त्री कैलासयात्रामधिकृत्य कृतोग्रन्थो अण् आख्यायिकायां तस्य लुक् । हरिवंशान्तर्गते “किमर्थं